# "तीर्थप्रबंध" पश्चिमप्रबंधः

**मंगळाचरण**

हरिक्षीरांबुधेः स्वैरं भवघर्मरिपोर्मनः ।
विहराहरहश्चित्रचारित्र चतुरोर्मिषु । १ ।

**हयगीव–**

हयग्रीव दयासिंधुरंधूकृतभवांबुधिः ।
प्रबंधमप्रतिद्वंद्व करोत्वेनमनेनसं ।

**आचार्य मध्वप्रार्थन–**

आजन्मभूमेरटतोखिलेषु तीर्थेषु तद्वर्णनभारमूढ्वा ।
आयासमस्मन्मृदुमानसस्य वायुर्मुहुः कृंततु मध्वरूपी ॥ ३ ॥

**वागीशतीर्थ प्रार्थने –**

वागीशतीर्थमुनिवर्य भवद्दयांबुयोगेन पावय मनोगृहमन्वहं मे ।
नागेंद्रतल्पमधिरोपय तत्पदाब्जरागेण रंजय कलिं जय तद्विविक्षुं ॥ ४ ॥

**ग्रंथद बग्ये –**

तीर्थक्षेत्रतदीशानां माहात्म्यानि यथामति ।
वादिराजो यतिः स्तौति पद्यैःकतिपयैः कविः ॥ ५ ॥

**परशुरामक्षेत्र–**

कर्णे पदन्यस्तरुची रिरंसुर्वाराशिवस्त्रं जघनाब्धि यस्याः ।
अमूमुचद्बाणकरेण भूमेःश्रीभार्गवः सा जयति क्षितिर्नः ॥ ६ ॥

**रजतपीठपुर (उडुपि)**

काशीतले कृतपदाऽपि सरित् सुराणामायाति यद्गतपवित्रसरो धुना पि ।
रुद्रादिदेवगणसेवितसर्वभागं तद्रूप्यपीठपुरमप्रतिमं त्रिलोक्यां ॥ ७ ॥

## उडुपि अष्टमठ –

यस्मिन् वाग्वज्रधारा दुरितकुलमहातूलदाहेऽति शूरा:
दंडप्रोद्भासिहस्ता: स्फुरदसिसमसन्मार्गसक्ता: समस्ता: ।
श्रीकृष्णस्नेहपाशा: श्रमहरगतय: शांतिभाजो विरक्ता:
योगींद्राश्चित्रलोकाधिपनिभविभवा मध्वदासा जयंति ॥ ८ ॥

## उडुपि –

द्वारावतीं सकलभाग्यवतीमुपेक्ष्य गोपालबाललललनाकरपूजनं च ।
वार्धिं वधूगृहमतीत्य स मध्वनाथोयत्रास्ति तद्रजतपीठपुरं गरीय: ॥ ९ ॥
रूप्यात्मकस्य भवतस्तुलनां न भेजु:क्षेत्राणि भारतमहीरचितान्यमूनि ।
ईशाचलं च जयसीश्वरमात्रवासं श्रीमध्वहस्तकमलार्चितकृष्णमूर्त्या ॥ १० ॥

## उडुपि कृष्ण वर्णन–

निर्मथ्योग्रभवार्णवे निजमनोऽभीष्टं दिशामीति य:
सम्यग् ज्ञापयितुं करेण विलसन्मंथानमन्येन च ।
रम्यं दाम दधन् महेशरजतग्रामश्रियो लंकृति:
कर्मंदीश्वरभक्तिबंधनवश: प्रीतोस्तु कृष्ण: प्रभु: ॥ ११ ॥

## दशावतारस्तुति –

चांचल्यं पृष्ठदेशे कठिणकृतिरधोवक्त्रता क्वापि कोपो
याञ्चा कस्मादकस्मादपकृतिरुपकारिष्वपि प्राज्ञमौले ।
स्त्यर्थेऽन्यस्त्रीष्ववज्ञा किमिति रमण ते चोरता मायिकत्वं
चित्रं रोहावरोहाविति विरसगिराऽप्यादृत: पातु कृष्ण: ॥ १२ ॥
रूप्यात्मकामरपुर: सर सन्निरूप्य रूप्यात्मकं च भवत: कृपया गतस्य ।
रूप्यात्मकालयकृतालय यत् त्वमेव रूप्यात्मनो गतिरिहापि तदीश पाहि॥१३॥

## अनंतेश्वर –

शिवांतर्यामितां स्वीयां प्रियान् प्रति निबोधयन् ।
दयावारिनिधि: शैवीं शिलामाश्रित्य शोभते ॥ १४ ॥

ईशस्याहीशपदवीं भासयन्निव भाविनीं ।
अध्यास्ते शेषशयनः स्निग्धां लिंगशिलां हरिः ॥ १५ ॥

**पाजक क्षेत्र –**

पवित्रं पाजकक्षेत्रं को न सेवेत कोविदः ।
सत्यलोकेश्वरः प्राणो यत्रावातरदुत्सुकः ॥ १६ ॥

**विमानगिरिय दुर्गादेवि –**

परश्वधधनुर्बाणगदातीर्थोपशोभिते ।
गिरौ यत्र सुतप्रेम्णेवास्ते नित्यं हरिस्वसा ॥ १७ ॥
त्रिशूलधारिणी दैत्यगजकुंभविदारिणी ।
गिरींद्रशिखरावासा दुर्गा स्वर्गापवर्गदा ॥ १८ ॥
प्रलये जलदुर्गाऽसि सर्गादौ गिरिविस्तृतिः ।
इदानीं स्थलदुर्गाऽसि दुर्गात्वं सद्गुणार्णवे ॥ १९ ॥
दुर्ज्ञेयत्वाद्दुःखदत्वाद्दुष्प्राप्यत्वाच्च दुर्जनैः ।
सतामभयभूमित्वाद्दुर्गाः त्वं हृद्गुहाश्रयात् ॥ २० ॥

**ऐल्लूरु विश्वनाथ क्षेत्र –**

रक्षोगणक्षपणदक्षमहात्रिशूलं त्र्यक्षं वलक्षतनुमुल्लसदक्षमालं ।
रूक्षाघशिक्षणविचक्षणशक्तियूथं दक्षाध्वरक्षयदमाश्रय विश्वनाथं ॥ २१ ॥
अंगानुषंगतभुजंगमतुंगभोगं गंगातरंगकृतमंगलमौलिभागं ।
संगीतलोलयतिपुंगवगीतगाथंतं गौर्यपांगरसमाश्रय विश्वनाथं ॥ २२ ॥
इंद्रादिदेवगणवंदितपादपद्मंचंद्रार्थचूडमरविंददलायताक्षं ।
कंदर्पवैरिणमनिंद्यममंदबोधंतं देवदेवमिममाश्रय विश्वनाथं ॥ २३ ॥
वंदारुनारदसनंदनमुख्ययोगिवृंदैः प्रवंद्यचरितैः परितश्चसेव्यं ।
इंदिंदिरोपमसितेतरकंठकांतिं सौंदर्यमूर्तिममुमाश्रय विश्वनाथं ॥ २४ ॥
छंदश्चयस्तुतचरित्र पुरत्रयारे कुंदप्रसूनकृतसेवनतृप्तचित्त ।
त्वां दीनबंधुमरुणेंदुलसत्कपर्दवंदेऽरिमर्दन सुहृद्धनविश्वनाथ ॥ २५ ॥

**नंदिकेश्वर (ऐल्लूरु) –**

सुचारुकर्णलांगूलशृंगांघ्र्युदरदृङ्मुखं ।
ककुद्मंतं वृषं श्वेतं नौमि शंकरवाहनं ॥ २६ ॥

**मध्यवाटमठ–**

भवघर्मभवार्तिघ्नः स मठः सेव्यतां सता ।
कृष्णद्वैपायनघनो यत्रागाद्वायुवर्त्मना ॥ २७ ॥

**वेदव्यास प्रार्थन (मध्यवाटमठ) –**

स्नेहार्द्रमध्वहृदयाख्यदशानुषक्तं मोहाख्यसंतमसकृंतनतीव्रशक्तिं ।
श्रीमध्यवाटमठपौरटभाजनस्थं व्यासप्रदीपमिममादरतो भजध्वं ॥ २८ ॥
वेदव्यास गुणावास विद्याधीश सतां वश ।
मां निराशं गतक्लेशं कुर्वनाशं हरेऽनिशं ॥२९ ॥

**चिंतामणि नरसिंह –**

भून्यस्तवामांकगवामपाणिं उत्क्षिप्तदक्षोरुगतान्यहस्तं ।
चक्रायुधं वेत्रवतीतटस्थं चिंतामणिं श्री नरसिंहमीडे ॥३० ॥
उद्धृत्य पातालतलात् करस्थचक्रेण चक्रं खलयीगिनीनां ।
निहत्य गौरीवरकामदोऽभूदुन्नम्रकर्णो नरसिंह एषः ॥ ३१  ॥

**नेत्रावती नदि –**

वराहनयनानंदधारा नेत्रावतीसरित् ।
शुष्कां तद्भक्तिलतिकां पुष्णाति कथमन्यथा ॥ ३२ ॥
कोललोलकृपाशीललोचनांबुजचुंबिनि ।
मज्जन् नेत्रावतीतोये तद्दयेक्षास्पदं न कः ॥ ३३ ॥

**नेत्रावती – कुमारधारा संगम-**

कुमारधारासरिता समेता नेत्रावती भाति तरंगिणीयं ।
त्रिमार्गगातीरगतोऽप्यवात्सीत् त्रिलोचनो यत्र सहस्रमूर्तिः ॥ ३४ ॥

**कुमारधारा –**

कुमारधारे सुजनोद्धारे विज्ञानधारया ।
पुनीहि मामघस्तोमं लुनीहि सदनीहितं ॥ ३५ ॥
कुमारधारे त्वत्तीरे मुक्तिद्वारे गुणाकरे ।
तपस्तपंतः सन्मंत्रं जपंतः स्याम संततं ॥ ३६ ॥

**सुब्रह्मण्य क्षेत्र –**

सुब्रह्मण्यस्य महिमा वर्णितुं केन शक्यते ।
यत्रोच्छिष्टमपि स्पष्टं श्वित्रिणः शोधयत्यहो ॥ ३७ ॥
ब्रह्महत्यादोषशेषं ब्राह्मणानां हरन्नयं ।
विरोधे तु परं कार्यमिति न्यायममानयत् ॥ ३८ ॥

**सुब्रह्मन्य स्तुति –**

सुब्रह्मण्य सुराग्रगण्य कुजनारण्यज्वलत्पावक
प्रब्रूयात् तव विक्रमं भुवि कविः को वाऽमरो वा दिवि ।
यः प्रागप्रतिमल्लतारकमहादैत्यं सुदृप्तं भवान्
विप्रौघप्रिय सुप्रभाव समरे कीडन्नजैषीद्विषं ॥ ३९ ॥
अन्नं ददासि विदधास्यखिलस्य रक्षां
क्लिन्नं पुनासि विलुनासि समस्तदोषान् ।
हे स्कंद वंद्य भवतो भुवने भवानी–
सूने कृपाजलनिधे कतमः समः स्यात् ॥ ४० ॥
प्रवर्तितस्कांदमतः पृथिव्यां जगत्पतिं श्रीपतिमात्मनाथं ।
रहस्युपाराधयितुं गुहाद्य गुहांश्रितोऽसीति मम प्रकर्कः ॥ ४१ ॥
श्रीविष्णुतीर्थमुनिमित्र सुरारिजैत्र श्रीकृष्णपज्जलजभृंग कृताघभंग ।
सह्येश देहि सकलैरुपजीव्यमन्नं संहर्तृ सर्वभुवनस्य कुमारमह्यं ॥ ४२ ॥

## वेदव्याससंपुट –

यत्र संपुटमस्फोटं कृष्णस्य स्फोरयत्यहो ।
अग्राह्यत्वमदृश्यत्वं किं पुनस्तत्र पंडिताः ॥ ४३ ॥
अभेद्यमतियत्नेनाप्यस्खलत्कृष्टविग्रहं ।
तत्पूजाभाजनं भाति माध्वं हृदिव संपुटं ॥ ४४ ॥

## पयस्विनी नदी –

पयस्विनि जगत्स्वामी त्वयि सन्निहितो ध्रुवं ।
न चेत् तत्प्रेयसी तीरे कथं ते वतरिष्यति ॥ ४५ ॥

## सुवर्णा नदि –

वेदाचलहृदुद्भूतां सुवर्णां को नु वर्णयेत् ।
अंहसो दह्यमानस्य श्रावयंतीं स्वनं जनान् ॥ ४६ ॥

## कुंभासि –

भासि कुंभासिसंज्ञ त्वं क्षेत्रं श्रीशगिरीशयोः ।
यत्र कुंभासुरस्यासिरभासीद्द्रौपदीपतिः ॥ ४७ ॥
गुहामुखं तीर्थनेत्रं वेदस्थानं वनायनं ।
यत्यर्थ्यं गौतमक्षेत्रं चित्रं तत्तनुवद् बभौ॥ ४८ ॥

## कोटीश्वर क्षेत्र–

चारु कोटीश्वरस्थानं शोभते यत् पुरत्रयं ।
पुराररिव निर्जित्य ध्वजेनाद्यापि जृंभते ॥ ४९ ॥
नमस्ते शितिकंठाय कोटिसंख्यर्षितोषणात् ।
यः कोटीश्वरसंज्ञोऽभूः स किं नैकर्षिकामधुक् ॥ ५० ॥

## कोडनारायण क्षेत्र –

क्रोडयोगीश्वरक्षेत्रं भाति शुक्तिमतीतटे ।
सतां मता द्विता यत्र स्पष्टोमेशरमेशयोः ॥ ५१ ॥

द्वासुपर्णेति वेदार्थभूतौ तौ प्रायशोऽमरौ ।
यदेकोऽश्नाति बहुशोऽनश्नन्नन्यो विवर्धते ॥ ५२ ॥
श्रुतिशतवर्णितचरितं यतिहृन्निरतं यथेष्टगुणभरितं ।
किंकरवरदमनिंद्यं शंकरनारायणं वंदे ॥ ५३ ॥
शूलसुदर्शनसुरुचं बालेंदूज्ज्वलकिरीटशोभितशिरसं ।
पंकजमुखकरचरणं शंकरनारायणं वंदे ॥ ५४ ॥
पिनोरुकटिसुनाभं ध्यानार्होरस्थिताहिफणहारं ।
शंखाभ्रवर्णमनघं शंकरनारायणं वंदे ॥ ५५ ॥

**कोल्लूरु मूकांबिका क्षेत्र –**

मूकांबिका कृपालोकादाकांक्षितफलप्रदा ।
मूकानकृत मे शत्रूनेकांतिकजनप्रिया ॥ ५६ ॥
क्वचित् पृथिव्यां परितश्चरंती नभःस्थलं चापि मुहुर्वजंती ।
विपक्षविध्वंसविधौ स्फुरंती कात्यायनी कंदुकवद्विभाति ॥ ५७ ॥

**सह्य पर्वत –**

सह्योऽप्यसह्योऽसि गिरे पापानामस्तु तत् तथा ।
अचलस्त्वं चलसि मन्मनसस्तन्नरोचते ॥ ५८ ॥

**हरिहर क्षेत्र –**

मुरपुरहर लक्ष्मीपार्वतीकेलिलोल स्फुरदसितसितांगासह्यचक्रत्रिशूल ।
परतर गुरुमूर्ते पावनापारकीर्ते हरिहर तव पादांभोजयुग्मं नतोऽस्मि ॥ ५९ ॥
हरे भवहरे तेऽंघ्रौ भक्तिर्मुक्तिप्रदाऽस्तु मे ।
वैराग्यभाग्यं वितर हर गौरी मनोहर ॥ ६० ॥
यदेकेन न वध्योऽरिस्ततो हरिहरावुभौ ।
सहागतावर्धदृश्यावैक्यं चेत् शत्रुणा जितं ॥ ६१ ॥
अर्धनारीश्वरः शंभुर्यथा भेदेऽपि दृश्यते ।
मूर्तेरेकैकभागस्तौ तथा हरिहरावुभौ ॥ ६२ ॥

निर्विषं वत्सनाभिश्च यथैकामाश्रितौ लतां ।
तथा हरिहरौ भिन्नतरावप्येकमूर्तिगौ ॥ ६३ ॥

**बिदरहळ्ळि अश्वत्थनारायण–**

मा याहि पुष्करमहीमथवा प्रयागं काशीं गयां बदरिकाश्रममत्यसाध्यं ।
सेतुं च राघवकृतं वरतुंगभद्रातीरस्थपिप्पलगृहं हरिमेहि सिद्ध्यै ॥ ६४ ॥
पादस्थानल्पपादः तनुनिहिततनुः कोमलाग्रस्थितास्यः
स्कंधस्कंधोऽग्र्यशाखास्थितकरनिकरः श्रीधराश्लिष्टपार्श्वः ।
व्याप्याश्वत्थं मुकुंदस्त्रिदशपरिवृतस्तुंगभद्रातिभद्रे
वेणुग्रामे सदाऽऽस्ते सकलजनमनोऽभीष्टदायी दयालुः ॥ ६५ ॥

**बिदरहळ्ळि अश्वत्थवृक्ष –**

मध्यस्थकृष्ण परिपालय भक्तवर्गं रुद्राश्रिताग्र रुजमर्दय सेवकस्य ।
पद्मासनावसथमूल सृजास्य तंतुं सद्वंद्य पिप्पलतरो वितराखिलेष्टं ॥ ६६ ॥
तुंगातरंगपरिवर्तनपूतवात संगेन तेऽंघ्रिप चलंति दलानि भांति ।
जनांतरोत्थदृढमूलदुरंतदुष्कृत्युन्मूलनोद्यतकरांगुलिकांतिमंति ॥ ६७ ॥

**बिदरहळ्ळि सोमेश्वर –**

सोमेश्वराय सितभूतिविकस्वराय प्रेमप्रवृद्धगिरिजाहृदि भास्वराय ।
तुंगोल्लसत्पवनपावितवंशपल्ली मांगल्यहेतुचरिताय नमः शिवाय ॥ ६८ ॥

**बंकापुरद केशव –**

शंखाभोजगदासुदर्शनधरं संकीर्त्यमानं सुरैः
कैंकर्यप्रियलक्ष्मणेंद्ररचितालंकारपूजोत्सवं ।
पंकोद्भूतसमानलोचनयुगं बंकापुरश्रीकरं
हुंकारस्वनधिक्कृताश्रितजनातंकं भजे केशवं ॥ ६९ ॥

**वरदा नदि –**

स्मरदाश्रितदुष्कर्मगुरुदाहविदारिणीं वरदां हरिदासेष्टवरदानरतां भजे । ७० ।
हरसायकनिर्दग्धपुर गायकधूर्धर सुरनायक दैत्येंद्रवरदायक पाहिमां ॥ ७१ ॥

**धर्मगंगा नदी –**

हे धर्मगंगे पापौघभंगे तुंगतरंगिणि ।
चेतो मदीयं सद्दर्मकर्मण्येव स्थिरं कुरु ॥ ७२ ॥

**शाल्मली नदि –**

नदी मुदेऽस्त्वियं प्रत्यङ्नदीनहृदयंगमा ।
गंगूत्तुंगा दृश्यतेऽब्धारम्याऽष्टम्यां यदंभसि ॥ ७३ ॥
भर्तुरग्रे स्वलावण्यविस्तृतेरविवेकिनीं ।
स्वासेवितां सखीमेतां सर्वसेव्यां करोति सा ॥ ७४ ॥

**सोदा त्रिविक्रम–**

गंगा माध्वयते: कीर्त्यैस्थानश्रीभूमनोहरं ।
कृत्वा त्रिविक्रमं चक्रे पितृमात्रग्रजोत्सवं ॥ ७५ ॥
त्रिविक्रमं रम्यगदारिशंख सरोजमालाधरमिंदुवर्णम् ।
मनोहरांगं यतिवादिराज प्रतिष्टितं नौमि सदा प्रसन्नं ॥ ७६ ॥

**मंजुगुणी क्षेत्र वेंकटेश –**

मनोहरगिरिद्रोणीवासं श्रीशं सतां वशं ।
धनुर्भाणधरं भाग्यकरं पापहरं भजे ॥ ७७ ॥
खलमृगमृगयार्थं पादुकाशोभिपाद: करधृतशरचक्रोद्दामशंखाग्र्यचाप: ।
सकलभुविचरित्वा मंजुगुण्याख्यरम्य स्थलसदनगतोऽभूद्वेंकटेशोमुकुंद:॥७८॥

**एण भैरवक्षेत्र –**

यस्य भैरवनादेन विद्रवंत्यघराशय: ।
एणा इव भयान्नित्यं तं नतोऽस्म्येणभैरवं ॥ ७९ ॥

**गोकर्णक्षेत्र – गोकर्ण**

ये विष्णो: पदपद्मचिंतनरतास्तत्कर्मनिष्ठाच्चये
ये तद्भक्तपरायणा: शुभधिय: येऽर्चंति मां चानिशं ।

एकांते तदभीष्टमाशु वसुधे देहीति गां बोधयन्
श्रीगोकर्णकृतालयो विजयते देवः स गौरीधवः ॥ ८० ॥
गोकर्णाभासितांगः प्रत्युपकुर्वन्निवांबिकारमणः ।
गोकर्णसंज्ञमधुना भासयति क्षेत्रमंबुधेस्तीरे ॥ ८१ ॥
पूर्णेंदुवर्ण गोकर्णाकार मारभयंकर ।
भवाय भव मे देव भवानीप्रिय शंकर ॥ ८२ ॥

## गोकर्णक्षेत्र विघ्नेश्वर–

दुष्टानां विघ्नकर्ता सुचरितसुजनस्तोमविघ्नापहर्ता
तस्माद्विघ्नादिपोऽहं मत इति सुधियां स्पष्टमाज्ञापनाय ।
पौलस्त्येच्चांतरायः सुरमुनिकराभीष्टसंप्राप्युपायः
श्रेयो विघ्नाधिराजः प्रदिशतु सततं भूरि गौरीतनूजः ॥ ८३ ॥

## कॊल्हापुर महालक्ष्मी–

अमानवनजस्थानसरसीकुलसंकुले ।
रमा कॊल्हापुरक्षेत्रे वसतीति किमद्भुतं ॥ ८४ ॥
ध्याताऽऽध्या तांतशांतप्रियजनविभवायान्वहं या हृदंतः
ख्याताख्या तादृशाभ्युन्नतिवितरणशक्त्यालया या पयोब्धेः ।
जाताऽजातादिदेवव्रजमनुजततेः श्रेयसे भूयसे सा
माता मा तापसाराधितपदकमला धोक्षजप्रेयसी स्यात् ॥ ८५ ॥

## तापा नदी–

तथं तापाभिधा तेऽंब तापघ्न्या इति संशयः ।
अघतापप्रदायिन्यास्तव संदर्शनाद्गतः ॥ ८६ ॥

## नर्मदा नदी–

स्वावगाहनमात्रेण या स्वर्गवनिताजनैः ।
सह नर्मगिरां दात्री भजे तां नर्मदानदीं ॥ ८७ ॥

**प्रभास क्षेत्र–**

सरस्वतीहिरण्याभ्यां संगो यत्रापरांबुधेः ।
प्रभासाख्य तदाभाति प्रभाऽऽस हि यतो भुवः ॥ ८८ ॥

**बाणगंगा–**

बाणप्रयोगसंजाता बाणगंगा विभाति सा ।
स्वच्चा स्मरदघच्छेत्रि कृष्णकीर्तिरिवोन्मुखी ॥ ८९ ॥

**द्वारका क्षेत्र–**

विश्वंभरां घनतरामपि भूरियत्नैर्निर्भिद्य यत्पदमुपेत्य बलींद्रगेहात् ।
आस्ते त्रिविक्रमतनुर्हरिरिद्वितीया सा द्वारकेप्सितपुमर्थकरी पुरी नः ॥ ९० ॥

**द्वारका त्रिविक्रम–**

त्रिविक्रमो विजयते त्वयोविख्यातविक्रमः ।
यः कुशं दमयित्वेमां चक्रे विप्रकुशस्थलीं ॥ ९१ ॥
सगदोऽपि ह्यसौ देवः संसारेऽगदतामगात् ।
त्रिविक्रमोऽप्यसौ योगिमनसोऽविक्रमोऽभवत् ॥ ९२ ॥

**गोमती नदी–**

श्रीकृष्णचरणांभोजरजोरंजितगोमतीं ।
गोमतीमब्धिरमणीं भजे तापत्रयापहां ॥ ९३ ॥
फुल्लफेनसितांभोधिकल्लोलधृतया तया ।
वल्लभांलिंगनसुखं दुर्लभं लभ्यतेऽनिशं ॥ ९४ ॥

**चक्रतीर्थ–**

चक्रतीर्थस्य महिमा वर्णितुं केन शक्यते ।
यच्चिलामपि संगेन विधत्ते विश्ववंदितां ॥ ९५ ॥

**शंखोद्धार क्षेत्र–**

पापेनापि समावृतस्य विमलज्ञानोज्जितस्याप्यलं
मग्नस्यापि भवांबुधाविह भवेत् पूतस्य जात्योद्धृतिः ।

इत्याख्यापयितुं दरं मुरहरो यत्रोद्दधारादरात्
शंखोद्धारपदं विभाति तदिदं क्षेत्रं पवित्रं भुवि ॥ ९६ ॥

**द्वारका क्षेत्र गोपीचंदन –**

फाले यल्लिखितं धुनोति विविधां लेखां विधात्रा कृतां
लीलार्थं तिलकीकृतं वितनुते विद्वल्ललामायितान् ।
ऊर्ध्वं यद्धृतमुच्चलोकपदवीसोपानमन्वेति तद्
गोपीचंदनमंजसा विजयते तापत्रयध्वंसनं ॥ ९७ ॥

**सिद्धपुरी क्षेत्र –**

भाति सिद्धपुरी यत्र सिद्धा मुक्तिपुरी नृणां ।
पुण्यं बिंदुसरो यत्र बिंदुमात्रं सरः समं ॥ ९८ ॥

**पुष्करतीर्थक्षेत्र –**

तीर्थानामुत्तमं तीर्थं पुष्करं मर्त्यदुष्करं ।
विहरन्नपि वाराशौ वराहो यत्सरो विशत् ॥ ९९ ॥
।।इति श्री वादिराज श्रीचरणकृत तीर्थप्रबंधे पश्चिमप्रबंधः।।

# उत्तर तीर्थप्रबंध

## कृष्णवेणी नदी –

नमामि सुकृतश्रेणीं कृष्णवेणीं तरंगिणीं ।
यद्वीक्षणं कोटिजन्मकृतदुष्कर्मशिक्षणं ॥ १ ॥
गुरुं कन्यागतं धन्या या पुरस्कृत्य सेव्यसे ।
श्रीकृष्णवेणि पापानि सा त्वं पुण्ययसि ध्रुवं ॥ २ ॥
किं वर्णयामि हे कृष्ण त्वयि कृष्णस्य सन्निधिं ।
यत् समस्तपदोक्तौ तु पुंभावमवलंबसे ॥ ३ ॥
श्रीकृष्णवेणि कल्याणि याचे त्वामहमन्वहं ।
श्रीकृष्णचरणांभोजे भक्तिं भक्तभवच्चिदि ॥ ४ ॥

## पंडरापुर पुंडरीक क्षेत्र –

श्रीभीमरथ्यमलनीरसमीरवेगनिर्धूततीरगनराशुभघर्मजालं ।
श्रीपांडुरंगलसितं वरपुंडरीकक्षेत्रं पवित्रमहमन्वहमाश्रितोऽस्मि ॥ ५ ॥

## पुंडरीक क्षेत्र विठल –

तीरे सत्सरितस्तिरस्कृतधनासक्तिर्विरक्तिप्रियः
पादांभोजमिदं मदंकसहितः संचिंतयांतर्हृदि ।
पश्चात् ते कटिमात्र एव भविता संसारवार्धिर्न चेत्
शिक्षामीति हि लक्षयत्यनुदिनं स्वावस्थया विठ्ठलः ॥ ६ ॥
पापावलीपाटनपट्वपांगःश्रीपाणिपद्मांचितजानुजंघः ।
गोपालबालः कृपया स्वयं नःश्री पांडुरंगो भवतु प्रसन्नः ॥ ७ ॥
पापापनोदनपटु प्रियभृत्यभृंगैः पेपीयमानशुभसुंदरतारसार्द्रं ।
तापत्रयोपशमनं तरुणार्कवर्णं गोपालबालचरणांबुरुहं श्रितोऽस्मि ॥ ८ ॥

## गोदावरी नदि –

विप्रर्षिदेवकुलसंकुलतीरयुग्मा विद्रावितांघतृणरेणुकणा स्ववातैः ।
स्वादूदकैः प्रशमिताखिललोकशोका गोदावरी शुभकरी सरिदुद्धरेन्नः ॥ ९ ॥

अंहांसि हंसि सततं किल रासि पुण्यं सिंहस्थिते सुरगुरौ न तदंब याचे ।
गोदे समस्तफलदे दिश कृष्णपादे भक्तिं विरक्तिमितरत्र परत्र मुक्तिं ॥ १० ॥
आदौ धवलगंगाख्या गंगाद्वाराभिधाऽंतरे ।
पश्चात् कुशावर्तपदा गोदा मोदाय सा सदा ॥ ११ ॥

**यमुना नदी –**

कालिंदि त्वमघान्वितानपि सतः कृत्वा पवित्रात्मनो
गंतुं नैव कदाऽपि मुंचसि तव भ्रातुर्निकेतं प्रति ।
किंतु क्षीरपयोधिवासनिरतान् प्रीत्वा करोष्याश्रितान्
स्निग्धे भर्तरि कामिनीजनरुचिः तत्पक्ष एव ह्यलं ॥ १२ ॥

**प्रयाग क्षेत्र त्रिवेणि –**

त्रिवेणीयमघश्रेणीकृपाणी मुक्तिकारिणी ।
ममानीहितमादद्याद्धिमानीमंशुमानिव ॥ १३ ॥

**प्रयाग माधव –**

प्रयागमाधवो भूयाद्दयावारिनिधिर्हृदि ।
प्रकृष्टयागसदृशी सकृद्यस्य हि संस्मृतिः ॥ १४ ॥

**गंगा नदी –**

त्वं दीनेषु दयावतीति विदितं यद्ब्रह्महस्ताश्रयं
प्राप्ताऽथाच्युतपादसंगमहिता पश्चाच्च नाकं गता ।
सौवर्णाचलशृंगमेत्य मुदिता शंभोः शिरः संगताऽ–
प्यास्माकक्षितिमंडले त्रिपथगे तुष्टाऽस्यभीष्टप्रदा ॥ १५ ॥
आदौ पादतलोर्ध्वभागमहसा या रक्तनीला हरेः
स्वर्गस्त्रीकुचकुंकुमांकनयनोपांतश्रियाऽभ्यंतरे ।
अंते शंभुकपर्दपन्नगगलश्रेणीज्वलज्ज्योतिषा
जन्मारभ्य सरस्वतीनतनयासंगेव गंगाऽस्ति सा ॥ १६ ॥
आज्ञानाद्यदि सज्जनेषु रचितद्रोहान्मयि स्वर्धुनि

स्वस्फूर्त्या सुजनेषु दूषणगणारोपादवज्ञा तव ।
तर्हि त्वां सगरात्मजास्थिनिकरा जानंति किं तैः प्रभोः
द्रोहः किं न कृतः किमंब न हरावरोपिता चोरता ॥ १७ ॥
आरभ्याब्जजलोकमाक्षितितलादायातया किं त्वया
मच्चित्तं बहुदूरमित्यमलया त्यक्तं भिया जाह्नवि ।
अक्षय्याचलतुंगशृंगनिकरान्निर्भिद्य यांती मम
स्वल्पं किं बहु मन्वसेऽशुभकुलं गंगेंऽतरंगे चलं ॥ १८ ॥
अस्थिस्पर्शनमात्रतः किमु तव श्रेयःप्रदत्वं गतं
विस्तीर्णा न किमच्युतस्य नगरी मन्मात्रदेशोज्झिता ।
तद्वर्त्मापि सकंटकं किमु सतां संतानजोऽहं न किं
कस्मादंब न मे प्रदास्यसि पदं गंगेऽखिलार्थप्रदं ॥ १९ ॥
हे गंगे तव कोमलांघ्रिनलिनं रंभोरु नीवीलसत्-
कांचीदाम तनूदरं घनकुचव्याकीर्णहारं वपुः ।
सन्मुद्रांगदकंकणावृतकरं स्मेरं स्फुरत्कुंडलं
सारंगाक्षि जलान्यदिंदुरुचि ये जानंति तेऽन्ये जलात् ॥ २० ॥
श्रीनारायणरामगोपतिहृषीकेशादिरूपोऽक्षम-
स्त्वां हातुं हरिसूकराकृतिरथ श्रीदेवहूत्यात्मजः ।
वेणीमाधवबिंदुमाधवतनुस्तीरे व्यधत्त स्थितिं
गंगे किं बहुनाऽधुनाऽपि वसति त्वद्भर्तृगेहऽप्यसौ ॥ २१ ॥
गंगे त्वं शुभसंचयस्य जयदा दोषात्मनां न त्विति
ज्ञातं यत् क्रतुकोट्यलभ्यसुकृतस्याभ्युन्नतिं यच्चसि ।
दुष्कर्माण्यमितानि दूरयसि च त्वद्गेयतोयेक्षया
पानेनाप्यवगाहनेन मनसा ध्यानेन गानेन वा ॥ २२ ॥

**काशी क्षेत्र –**

रूप्याचले कृतपदोऽपि गिरींद्रपुत्रीप्रेमप्रवाहभरमानितमानसोऽपि ।
काशीमसीवरणयोः पुरमंतराले प्रेतावृतामपि सतीपतिरध्यतिष्ठत् ॥ २३ ॥

**बिंदुमाधव क्षेत्र –**

स बिंदुमाधवः पायाद्विभोर्यस्य निरीक्षणात् ।
अपारोऽपि हि संसारसिंधुर्बिंदुत्वमश्नुते ॥ २४ ॥

**काशी विश्वनाथ –**

दोषं मे हर हे हरेति पतितं पादे नखच्छद्मना
निर्दोषं मृगबिंबमेणहरणात् कृत्वेव मूर्ध्नि न्यधात् ।
गंगातीरनिवासतः शुचितमं कुर्वन्निवाहीश्वरा–
संगात् तत् प्रथयन्निव प्रतिदिनं पायात् स मृत्युंजयः ॥ २५ ॥
मौलौ यच्चरणांबु फालफलके यस्यांघ्रिरेणुः कथा
कर्णे वाचि यदीयनाम हृदि यद्रूपं यदास्वादितं ।
कुक्षौ यत्तपसेऽपटं कटितटं व्याघ्राजिने संस्थितिः
पादौ यत्पुरचारिणौ स हि सदा तत्किंकरः शंकरः ॥ २६ ॥

**गया क्षेत्र**

गयाभिधमिदं क्षेत्रं श्रये श्रेयस्करं नृणां ।
न यत्र सहते जातु क्रिया जन्मांतरकियां ॥ २७ ॥

**गया गदाधर क्षेत्र–**

गदाधर सदाऽधरस्फुरिताचारुहासोल्लसत् सुधाधर मुदाधरामरकृतस्तते सुंदर ।
पदा धर मुदाधरस्खलितमीश मां सद्वरप्रदाधरचिदादरप्रमुदितांतर श्रीधर ॥२८॥

**विष्णुपाद – गया क्षेत्र–**

यद्यात्रा पितृमंडलस्य तनुते वैकुंठयात्रां परां
यत्र क्षिप्ततिला महांति तिलशः कुर्वंति पापान्यहो ।
पिंडो यत्र समर्पितो यमभटान् पिंडीकरोत्यक्षता

मर्त्यं स्माक्षतमीड्यतां स्तुतिततिस्तं विष्णुपादं भजे ॥ २९ ॥

**फल्गुनदी – गया क्षेत्र –**

अपि जन्मशतोद्भूतं कृपया या हरंत्यघं ।
मनुते फल्घु सा फल्गुनदी सद्गुणदाऽस्तुमे ॥ ३० ॥

**मधुरा क्षेत्र –**

सेना यत्र विरक्त वैष्णवजना नामायुधं श्रीपते:
कामाद्यै: सहित: कलि: किल रिपुर्यत्रान्वहं हन्यते ।
प्राकारादि च यत्र तीर्थनिचय: कर्मापि वर्मामलं
दद्यात् सा मधुरा पुरी शुभकरी श्रेयापि भूयांसि न: ॥ ३१ ॥

**विश्रांतितीर्थ – मधुरा –**

संसारसंसरणखेदविभेदकारि कंसारिसंश्रिततटीगतचारुवारि ।
विश्रांतितीर्थममलं हरिलोकावासविश्रांतिदं दिशतु न: सकलेप्सितानि ॥३२॥
मखकोटिसहस्राणां मुखं म्लानयतो मुहु: ।
आगश्रांतिकरस्यास्य कथं विश्रांतितीर्थता ॥ ३३ ॥

**वृंदावन –**

यत्कुंजा मुरवैरिसंगतवधूविक्रीडनैर्वासिता
यत्संजातसुरद्रुमौघमहसा विद्योतिताशामुखं ।
यत्पाथ: सुरसिंधुसिंधुमहितं यत्राखिलैर्लक्षितं
श्रुत्यंतांतरितं मह: परमहो वृंदावनं पावनं ॥ ३४ ॥

**अयोध्या –**

अयोध्या नाम नगरी भाति साध्वी वधूरिव ।
वनंगतस्यापि तस्य पादुके याऽकरोत् पतिं ॥ ३५ ॥

**नैमिषारण्य –**

मुनींद्रमानसावालरूढकृष्णकथालता ।
विभाति नैमिषारण्यमही सर्वमहीयसी ॥ ३६ ॥

**हस्तिनावती –**

अंतर्निविष्टकलिकौरवसैनिकाऽपि या धर्ममेव दयितं वरयांबभूव ।
योगींद्रबुद्धिरिव भीमपराक्रमेण सा भाति हस्तिनपुरी प्रथिता पृथिव्यां ॥३७॥

**कुरुक्षेत्र –**

श्री भीमसेनकरकंजगदाप्रहारैश्चूर्णीकृताश्वगजपत्तिमृदुग्रपिंडं ।
उत्खातपार्थशरसस्यपदं कुरूणां क्षेत्रं दिशासु विततान सुकीर्ति ध्यानं ॥३८॥

**शंबल –**

कलेर्भितजना यात शंबलं जगतां बलं ।
कलिशौर्यहरः कल्की यत्र प्रादुर्भविष्यति ॥ ३९ ॥

**षट्प्रयागगळु –**

षट् प्रयागाः स्ववेगेन कामाद्यरिमहीरुहः ।
उन्मूलयंतु पापाख्यं पंकं प्रक्षालयंतु नः ॥ ४० ॥

**बदरी –**

अमरीभ्रमरीपुंजसुमरीचिभिरंचिता ।
बदरी वद रे किं किमधरी कुरुते न सा ॥ ४१ ॥

**बदरीनारायण –**

धर्माद्योऽजनि धर्म एव स रतिं दद्यात् स्वयोगश्रियं
योगाभ्यासरतः स्मरादिविजयं कंदर्पदर्पापहः ।
उत्तुंगाद्रिगतः सदोच्चपदवीं योषित्कदंबेषु नः
पुत्रीवन्मतिमुर्वशीजनयिता नारायणः सद्गुणान् ॥ ४२ ॥
हस्तद्वंद्वगचक्रशंखरुचिरं वृत्तोरुमध्यस्फुर–
द्रक्तोत्तानकरारविंदयुगलं पद्मासनस्थं प्रभुं ।
विष्वक् नारदमुख्ययोगिनिकरैः संसेव्यमानं सुधा–
वीक्षाक्षालितभक्तकिल्बिषविषं नारायणं चिंतये ॥ ४३ ॥

### श्री हयग्रीव – बदरीकाश्रम

यत्रक्षेत्रे विधेः सत्रे हयग्रीवो ह्यवातरत् ।
धाराद्वारा त्रयी तत्र श्रूयतेऽद्यापि सूरिभिः ॥ ४४ ॥
धातर्देवसमूह मंदर महि प्रह्लाद शक्र द्विज–
व्रात ख्यातसमुद्र पार्थ शिव सद्दर्मानृतं मा वद ।
अश्वग्रीवममुं विहाय कतमं देवं नमामः स्तुमः
सत्कुर्मः किमु कर्म शर्मदमितोऽन्यद्ब्रह्म किं वाऽस्ति नः ॥ ४५ ॥
श्लोकेनैकेन लोकेशश्लोकाल्लेशोऽनुर्वणितः ।
तच्चसच्चरितश्चित्ते प्रत्यर्प्य प्रीयतां मम ॥ ४६ ।

**॥ इति श्रीमद्वादिराजतीर्थ श्रीपादविरचित तीर्थप्रबंधे उत्तरप्रबंधः ॥**

## तीर्थप्रबंध – पूर्वप्रबंध

### गंगासागर संगम

अब्धे स्निग्धोऽसि सरसेष्वाद्योऽस्यब्जसखोऽप्यसि ।
मुखैरनेकैर्यो गंगामुखान्याचुंब्य जृंभसे ॥ १ ॥

### पूरि जगन्नाथ

जगन्नाथो विजयते जगतामर्चितः सदा ।
ज्ञानाख्यरम्यपरशोर्यं दारु जगुरागमाः ॥ २ ॥

### श्रीशैल मल्लिकार्जुन –

श्रीशैलशिखरावासो भातीशो मल्लिकार्जुनः ।
बद्धस्वीयजटाजूटमध्यस्थ इव चंद्रमाः ॥ ३ ॥

### अहोबल क्षेत्र

अहोबलनृसिंहस्य महोबलमुपाश्रिताः ।

असत्तमिस्रसंमिश्रां गणयामो न संस्कृतिं ॥ ४ ॥
यस्तंभे प्रकटीबभूव स मयि स्तंभायितेऽपि स्फुटी–
भूयाद्यो भवनाशिनीतटगतश्छिंद्यात् स मेऽमुं भवं ।
योऽपाद्बालकमप्यसौ नरहरिर्मां बालिशं पातु यो
रक्षोऽशिक्षदसौ प्रभुः खलकुलं शिक्षेदरूक्षप्रियः ॥ ५ ॥
विरुद्धधर्मधर्मित्वं सर्वांतर्यामितां तथा ।
नरसिंहोऽद्भुतस्तंभसंभूतः स्पष्टयत्ययं ॥ ६ ॥
विदारितरिपूदरप्रकटितांत्रमालाधरं तदात्मजमुदावहप्रियतरोग्रलीलाकरं ।
उदाररवपूरितांबुजभवांडभांडांतरं सदानरहरिं श्रये नखरनव्यवज्रांकुरं॥७॥
उद्यन्मध्वमतायुधेन परितः संसारसंज्ञे वने
माद्यन्मायिमतंगमर्दनविधौ सोऽहं सहायस्त्विति ।
हर्यक्षस्य सदृक्षतां वहति यस्तस्य द्वितीयोऽप्यहं
साजात्येन सदा मानवतुलां पायन्नृसिंहः प्रभुः ॥ ८ ॥
नृसिंहविलसत्पादकुशेशयकृतोत्सवे ।
भवनाशिनि मच्चीर्णपापानां भव नाशिनी ॥ ९ ॥
निवृत्तिसंगमो भाति यत्र मर्त्यमुपाश्रिताः ।
निवर्तंतेऽखिला दोषाः संयुनक्ति शुभावलीं ॥ १० ॥

## तुंगाभद्रा –

नतोऽस्मि तुंगां विलसत्तरंगा मघौघभंगां हरिपादसंगां ।
श्रितोऽस्मि भद्रां हतपापनिद्रां विमुक्तिपद्यां विमलैकसाध्यां ॥ ११ ॥
तटिनीषु तुंगभद्रे स्वादूदकसंकुला त्वमसि नूनं ।
कस्मात् तीर्थपदोऽसौ धत्तेत्वामेव दंष्ट्रयोर्नोचेत् ॥ १२ ॥

## हंपे विठल –

चौर्यान्मातृनिबद्धचारुचरणः पापौघचौर्याद्बुधैः
बद्धस्त्वं पथि पुंडरीकमुनिना जारेति संबोधितः ।

तुंगातीरगतोऽसि विठ्ठल दिशन्नन्याकृतिर्वांछितं
वेत्तृणां यदि मे न दास्यसि पदं त्वत्संस्थितिः कथ्यते ॥ १३ ॥

**हंपे –**

पंपाध्यक्षो विरूपाक्षः संपदे स्यात् सतां सदा ।
यो हेमगिरिसीमायां राजते राजशेखरः॥ १४ ॥
पंपा संपत्करी सेयं किं पापं न हरेन्नृणां ।
याऽधोमुखीकरोत्येतन्नामोच्चारणमात्रतः ॥ १५ ॥
मालाभिः समलंकृताऽतिविमला लोल्लोल्लसल्लोचना
शूलेन त्रिदलेन दैत्यकलने कालायितेन द्विषः ।
फाले पादतलं निधाय बलिनं योन्मूलयंती खलं
बाला मे बलदाऽस्तु लोलवलया श्री बालहंपालया ॥ १६ ॥

**आनॆगॊंदि–**

राजधानी जयति सा गजगह्वरसंज्ञिता ।
यत्र भांति गजा माध्वराद्धांतधरणीधराः ॥ १७ ॥

**मळखेड जयतीर्थरु –**

माध्वग्रंथान् स्वबंधूनिव सरसहृदाऽऽलिंग्य विज्ञातभावः
संयोज्यालंकृताभिः स्वसहजमतिसंभूतवाग्भिर्वधूभिः ।

**तिरुपति श्रीनिवास –**

कृत्वाऽनोक्तीश्चदासीर्बुधहृदयगृहं प्रौढवृत्तीश्च वृत्तीः
दत्वाऽन्योन्याभियोगं जयमुनिरसकृद्वीक्ष्य रेमे कृतार्थः ॥ १८ ॥
श्रीवेंकटलसच्चैलवासी दासीकृतामरः ।
छायया पातु मां नित्यं श्रीनिवाससुरद्रुमः ॥ १९ ॥
दृष्ट्यादिशि दिशि स्वीयान् दयया पालयन्निव ।
वर्तते विश्वतश्चक्षुर्वेंकटे वेंकटेश्वरः ॥ २० ॥
ये शंखचक्रोज्ज्वलबाहुयुग्माः स्वांघ्रि भजंते भवसिंधुरेषः ।

कटिप्रमाणस्त्विति वेंकटेशः स्फुटीकरोत्यात्मकरांबुजातैः ॥ २१ ॥
प्रायोऽन्यत्र गतां श्रियं निजवशां कर्तुं मुहुःकांक्षितं
भक्तानां प्रदिशन् धनं प्रतिदिनं संसाध्य साध्यप्रियः ।
तत् तत्रैव पुनः सहस्रगुणितं पश्यन् घनश्यामलः
तेषां वेश्मसु विस्मितो निवसति श्रीवेंकटेशोऽनिशं ॥ २२ ॥
आरूढगरुडस्कंधमालिंगितरमाधरं ।
आनमज्जनसर्वस्वमाश्रये वेंकटेश्वरं ॥ २३ ॥
कशिपूकृत्य यं शेते गिरीकृत्याधिष्ठति ।
आर्वतीर्णोऽनुजीकृत्य स तद्भक्ताग्रणीः फणी ॥ २४ ॥
शंकररविशशिमुख्याः किंकरपदवीमुपाश्रिता यस्य ।
वेंकटगिरिनाथोऽसौ पंकजनयनः परात्परो जयति ॥ २५ ॥
श्री वेंकटगिरिद्रोणी क्षोणी यस्यानणीयसी ।
तं वरेण्य सुराग्रण्यं वेदगम्यं भजामहे ॥ २६ ॥
श्री वेंकटपते दीनगते रम्याकृते क्षितौ ।
समः समस्तमर्त्यार्तिप्रमर्दन किमस्ति ते ॥ २७ ॥
समस्तसुजनाधारं दोषदूरं गुणाकरं ।
श्रीवेंकटाचलावासं श्रीनिवासं भजेऽनिशं ॥ २८ ॥
आनंदतीर्थवरदे दानवारण्यपावके ।
ज्ञानदायिनि सर्वेशे श्रीनिवासेऽस्तु मे मनः ॥ २९ ॥
सुवर्णमुखि संसेवे सुवर्णाभं पयस्तव ।
सुवर्णशोभिवदनं कुरु मामंब निर्मलं ॥ ३० ॥

## कंचि वरदराज –

रम्यो वरदराजोऽयं रसिकाग्रेसरो ध्रुवं ।
कथमात्मवधूश्लाघ्यकांचीदेशे न चेद्वसेत् ॥ ३१ ॥

याचे वरदराज त्वां कांचीशेह न किंचन ।
चेतनाचेतनजगद्वरं त्वामेव देहि मे ॥ ३२ ॥
द्विजेष्टदातृत्वमजार्चिततत्त्वमजन्मतां स्वां मखभोकृतां च ।
व्यनक्त्ययं श्रीपतिरग्रहारपरीतधातृक्रतुवेदिजातः ॥ ३३ ॥

## एकाम्रेश्वर (शिवकंची)

कंतुरम्यशराक्रंतस्वांतं मत्वेव पार्वती ।
आम्रमूले स्थितं शंभुमालिंग्यास्ते शुचिस्मिता ॥ ३४ ॥

## कंचि कामाक्षी –

प्रपद्ये तव कामाक्षि चरणौ शरणं सदा ।
यत्सौंदर्यांबुधिं द्रष्टुं त्रिनेत्रोऽभून्महेश्वरः ॥ ३५ ॥
उत्पादयंस्त्वयि सुतौ गिरिजे गिरीशः
सौंदर्यभंगजभियेव भवो भवत्याः ।
कामाक्षि विघ्नहरमेकमसावकार्षीत्
षाण्मातुरं त्वपरमंगजभंजकोऽपि ॥ ३६ ॥

## तिरुवण्णामलै अरुणाचलेश्वर–

फणिगणवरभूषः पार्वतीश्लाघ्यवेषः खलजनकृतरोषः खंडितात्मीयदोषः ।
सदरुणगिरिवासः शक्रसूर्याद्यधीशःपरिहृतभवपाशः पातुमांपार्वतीशः॥३७॥

## तिरुकोयिलूरु त्रिविक्रम –

त्रिविक्रम न विक्रमं गणयितुं फणी शक्न्युते
तवेश नतवेपथुप्रशमनं परे किं पुनः ।
अजांडघनभांडखंडनपटीयसी यन्मृदु–
प्रदीप्तनिगमोक्तपन्नखशिखा जगद्यापिनी ॥ ३८ ॥

## वृद्धाचलेश्वर –

वृद्धाचलकृतावासः सद्योजातस्त्रिलोचनः ।
अद्यैव ज्ञाननयनं वर्धयत्वचलं मयि ॥ ३९ ॥

हराय भजकानिष्टहराय पुरवैरिणे ।
भवाय भवते भूयाच्छिवाय शिरसा नमः ॥ ४० ॥

**श्रीमुष्णं क्षेत्र – श्रीभूवराह –**

वराह वरदंष्ट्रया कुटिलया कठोरं रिपुं
विदार्य सुरधुर्य गां निजपदारविंदानुगां ।
उपेत्य सुखचित्तनुः सरसलीलयाऽऽलिंग्य तां
सितांग जगतां गते विहरसीह पुण्यस्थले ॥ ४१ ॥

**कुंभघोण –**

कुंभघोणे वस श्रीश शार्ङ्गमाच्छादय प्रभो ।
तथाऽप्यतुललावण्यैर्जलानास्त्वां जानतेऽच्युतं ॥ ४२ ॥
हृतभूभारदैतेय कृतविश्वजनावन ।
शार्ङ्गपाणे शराणां ते लक्ष्यं पापानि मेऽधुना ॥ ४३ ॥

॥ इति श्रीमद्वादिराजतीर्थ चरणकृततीर्थ प्रबंधे पूर्वप्रबंधः ॥

---

# दक्षिण तीर्थप्रबंध

## श्रीरंग – रंगनाथ

कावेरीहृदये वसन् कमलभूतातः कृपावीक्षणै–
र्जीवांहः शमयन् श्रिया च धरया सेव्योऽतिभव्यो विभुः ।
देवैरावरणस्थितैः कृतनतिः शेषांगशायी सदा
भावे मे विधुपुष्करिण्यधिपतिः श्रीरंगनाथोऽस्त्वयं ॥ १ ॥
श्रुतिशतपरिगीतः शुद्धभावैर्गृहीतः कमलनिलयतातः कंजनेत्रः प्रतीतः ।
सकलजगदतीतः सर्वसंपत्समेतः प्रविशतु मम चेतः प्रत्यहं रंगनाथः ॥ २ ॥
श्रीरंगनाथः सुरसिद्धगीतः कारुण्यसिंधुः कविवर्गबंधुः ।
स्मेरास्यचंद्रः स्मरतां महेंद्रक्ष्मारुट् प्रसन्नः क्षपयत्वघं नः ॥ ३ ॥

लये शयानोऽप्युदरस्थ लोकभरेण लक्ष्मीकरविभ्रमैश्च ।
अनिद्रितोऽद्यांघ्रिनिषेवणे तां नियुज्य निद्रासि किमंबुजाक्ष ॥ ४ ॥
निजांघ्रिसेवानिरतान् मनुष्यान् विधूतनिद्रान् विदधासि यस्त्वं ।
तवेश तस्यामलबोधमूर्तेः सहामहे संप्रति नैव निद्रां ॥ ५ ॥
नवांभोदनीलः स्फुरद्धेमजालः स्मरच्चित्तलोलः सुरश्रेणिपालः ।
श्रिये रंगधामाऽस्त्वयं पुण्यनामा महैश्वर्यसीमा गुणस्तोमभूमा ॥ ६ ॥
सहस्रवदनः शेषः पंचवेदान् पठंस्तव ।
पंचास्योऽभूद्द्विजिह्वश्चत्वां क्षेत्रेण समं स्तुवन् ॥ ७ ॥
यथा श्रिया त्वं सततं रंगक्षेत्रे व्यरूरुचः ।
तथा हरे मेऽंतरंगे रंगनाथ विरोचय ॥ ८ ॥

## चंद्रपुष्करिणी तीर्थ–

हित्वा हरजटागंगां यत्रेंदुरतपत् तपः ।
चंद्रपुष्करिणी सेयं मंदभाग्यैर्न सेव्यते ॥ ९ ॥

## कावेरि नदि–

कावेरि कमनीयांगं रंगनाथं सदा हृदि ।
धत्से त्वत्सेवया देवि को नु कुर्यान्न तं हृदि ॥ १० ॥
मोक्षदानक्षमाः संति सरितस्तत्र तत्र हि ।
कावेरी चोलभूमाता भुक्तिमुक्तिकरी सरित् ॥ ११ ॥

## वृषभाचल श्रीहरि–

यस्यांतकोऽपि शिरसा दास्यं धत्ते तपस्तपन् ।
स स्याद् वृषभशैलेंदुरस्माकं श्रेयसे हरि : ॥ १२ ॥

## नूपुरगंगा तीर्थ–

हरिनूपुरजातेऽलंकुरु गंगे मनो मम ।
परिहृत्य घनीभूतदुरितस्तोमकर्दमं ॥ १३ ॥

## दर्भशयन

यत् प्राग्जघान तृणमस्यस्त्रीभूयापराधिनं ।
दयालुरब्दौ तेनाभूद्दर्भशायीह राघवः ॥ १४ ॥

## श्रीरामसेतु

सीतामात्मसुतां खलैरपहृतामानेष्यतः स्वां पुरीं
जामातुर्हितकारिणीव धरणी वार्ध्यंबुवृद्धाकृतिः ।
भूभारक्षपणोद्यतस्य सचिवीभूता महीध्रा इव
श्रीरामस्य भटैः कृतो विजयते सेतुर्विजेतुर्द्विषां ॥ १५ ॥
प्रगीतजानकीनाथप्रतापस्वर्णवैभवे ।
प्रत्यमार्थमयं सेतुर्निकषाश्मायते नृणां ॥ १६ ॥
न मूर्छति शिलोच्चये पवनवेग इत्यज्ञवाक्
यतो हनुमताऽऽहृताः सुबहवो मरुत्सूनुना ।
गभीरतरवारिधिस्थगनचुंचवः पर्वताः
जयंति कृतसेतवः क्षपणहेतवो रक्षसां ॥ १७ ॥
पारावाराख्यरम्योपनिषदि विलसत्सेतवे सूत्रमात्रे
रामव्यासेन सेनानुगतिफलकृते दर्शिते रामभृत्यः ।
नानास्थानोपनीतैर्हनुमदभिनवश्रीमदानंदतीर्थ–
स्तेनेऽमानाद्रिमानैस्तमिममतिधृढं रम्यमात्मीयगम्यं ॥ १८ ॥
रामांघ्रिरेणुप्रेम्णेव सेतोरुभयतोऽबुधिः ।
अभ्येति पौनःपुन्येन वर्धमान पदे पदे ॥ १९ ॥

## श्री रामदेवरु

सीतालक्ष्मणशोभिपार्श्वयुगलः प्रीत्योऽवनम्राकृतिं
वक्त्रांभोरुहसक्तहस्तकमलं भक्तं भटाग्रेसरं ।
एकांते हनुमंतमुक्तिसुधया संतर्पयन् संततं
रामः स्तंभितवारिधिर्विजयते धानुष्कचूडामणिः ॥ २० ॥

## रामेश्वर–

कामद्विषं कामितदानदक्षं श्रीमज्जटाजूटविभासिगंगं ।
रामेश्वरं रामकृतप्रतिष्ठं रामागृहीतार्धतनुं नतोऽस्मि ॥ २१ ॥
कल्पांते सुरभूसुरासुरमुनिस्तोमं हरन् कं हरं
पृथ्वां पातककोटिपाटनपटू रामः समाराधयन् ।
यत्पादाब्जरजोऽहरन्मुनिवधूपापं श्रुता यत्कथा
मुक्तिं दोग्धि परेशितुः परमियं लीला खलध्वंसिनः ॥ २२ ॥
यं ध्यायंस्तारकब्रह्ममंत्रं जपति धूर्जटिः ।
अघोत्ताराय काकुत्स्थः पूजयामास तं किल ॥ २३ ॥
ब्रह्महत्यानिमित्तेन कपाल्यास्तेऽधुनाऽपि यः ।
अंहस्तदेव संहर्तुं स रामस्यार्चितः किल ॥ २४ ॥
यद्रावणवधे हेतुः सेतुर्जेतुं क्षमस्तमः ।
तदघं तद्रिपोरासीदसंगस्य किलाद्भुतम् ॥ २५ ॥

## धनुष्कोटि–

यद्द्वारतस्थबहुतीर्थनिषेवणेन लभ्यं फलं दिशति तन्मम सेतुखंडः ।
इत्थं धियेव परिवर्तितचापकोव्या चिच्छेद सेतुमधिकं रघुपुंगवोऽत्र ॥ २६ ॥
जना नानादानाध्ययनयजनापूर्तविधिना
वृथा खिन्ना दैन्यं भजथ निजनिःश्रेयसकृते ।
सुरश्रेणीक्षोणी सकलसुजनाभीष्टफलदा
धनुष्कोटी पेटी सुकृतसुधनस्यास्ति महती ॥ २७ ॥
पात्रिव्रत्यक्षयाख्यललनादोषांकुरच्छेदनं
पाषाणीकृतगौतमार्यवनिताविज्ञानदानक्षमं ।
साम्राज्योचितभोग्यभोगविरसं श्रीराम तेऽंघ्रिं श्रये
नैर्मल्याय निरंतरस्मृतिकृते वैराग्यभाग्याय च ॥ २८ ॥

कपिकटकधुरीणः कार्मुकन्यस्तबाणः क्षपितदितिजसैन्यः क्षत्रियेष्वग्रगण्यः ।
जलधिरचितसेतुर्जानकीतोषहेतुः पथि पथि गुणसांद्रः पातु मां रामचंद्रः॥२९॥

**ताम्रपर्णी नदि–**

ाम्रपर्णीसरित्तोयं सेवनीयं मुमुक्षुभिः ।
मुक्तीकरोति तत्रत्या शुक्तिश्च पतितं जलं ॥ ३० ॥

**महेंद्रपर्वत –**

तरणिरिव हनूमान् प्राप लंकां दिदृक्षु र्धरणि तव तनूजां नैव भेतव्यमंब ।
इति गदितुमिवांतः प्रापितो भाति भूमेःपवनसुतजवेनामंदमाहेंद्रशैलः ॥ ३१ ॥

**कन्याकुमारि**

या सूते सेवमानानां भाग्यारोग्यापुनर्भवान् ।
कन्या किलेयं तीर्थं च कन्यातीर्थमिदं किल ॥ ३२ ॥
सहधर्मं विदधतीमिव बाणांतकारिणीं ।
वार्धौ स्निग्धामिमां रम्यां कन्यां मन्यामहे रमां ॥ ३३ ॥
असि मन्मथमाता त्वं कन्ये मान्यतमे सतां ।
न चेत् सौंदर्यमाश्चर्यं कथमेतत् तनौ तव ॥ ३४ ॥
अगस्त्यो मुनिशार्दूलो भवाब्धेर्नः समुद्धरेत् ।
चुलकीकृतगंभीरजृंभितांभोधिडंबरः ॥ ३५ ॥

**सुचींद्रं–**

इंद्रशौचविधानात् ते न शुचींद्रातिपौरुषं ।
अनिंद्रस्य मनः शौचं कृत्वा तदार्जया ॥ ३६ ॥

**आद्यनंतशयन**

शेषे शयान शरदिंदुसमानवक्त्र श्रीशादिकेशव सितोदकजातनेत्र ।
दोषातिदूर गतपार गुणांबुराशे दासे दयां कुरु मयीश गतेतराशे ॥ ३७ ॥

### घृतमाला नदी–

रूक्षपापाटवीदाहदक्षज्ञानानलोन्नते: ।
सततं हेतुभूतेयं घृतमाला विराजते ॥ ३८ ॥

### तिरुवनंतपुर –

श्रीभूभ्यां कृतपादसेवनमनर्घ्योरुस्फुरद्भूषणं
शेषांगे सततं शयानमुदरप्रोद्भासिपद्मं प्रभुं ।
धात्रा स्तोत्रचयै: स्तुतं फणिफणैश्छत्रोपमैर्मंडितं
सेवेऽनंतपुरेश्वरं मुनिवरप्रेमाकरं श्रीकरं ॥ ३९ ॥
किंलोकात्मकपद्मकंपनभिया पुत्रप्रियेणाथवा
नानाग्रेसरभोगसौभगकृतस्नेहेन वाऽहर्निशं ।
किं वा श्रीश निजार्पितोरुविधसुस्वाद्वोदनास्वादना–
च्छेषेऽनंतपुरेश शेषेवपुषि श्रीसेवया वाऽग्र्यया ॥ ४० ॥
त्रीणि त्रयी परिजगाद यदात्मदृष्टिद्वाराणि चारुतरशीलनरोचितानि ।
प्रत्यक्षमेतदनुभावयति प्रमेयं प्रौढप्रजा: प्रभुरनंतपुरेऽब्जनाभ: ॥ ४१ ॥
या तैत्तिरीयनिगमांतगकिंवदंती सेवात्रयोचितफलत्रितयं वदंती ।
तत्रस्य संशयमपाकुरुतेऽंघ्रिमध्यवक्त्रं क्रमेण घटयन् दृशि पद्मनाभ: ॥ ४२ ॥
पास्यनंतपुरेश त्वमशेषं शेषशाय्यपि ।
तथा हि करुणावंत: परकार्यधुरंधरा: ॥ ४३ ॥
यथा गुहामुखे नाथ शेषे शेषे रमापते ।
तथा हार्दगुहामध्यमध्यासीनो रमस्व मे ॥ ४४ ॥
सुरगणपरिवार: शोभमानोरुहार:करिकरसमहस्त: कांचनोद्दीप्तवस्त्र: ।
शुभजनकृतगान: शेषभोगे शयान:प्रभुरयमविनाश: प्रीयतामिंदिरेश: ॥ ४५ ॥

### उपसंहार–

नानावृत्तं स्वयात्राक्रमपरिचितसुक्षेत्रमाहात्म्ययुक्तं
शब्दालंकारबद्धं शमलकुलहरिश्लाघनीयार्थहृद्यं ।

श्रीनाथप्रीतिहेतोर्हयवदनकृपांभोधिसंभूतरत्नं
चक्रे तीर्थप्रबंधं बहुगुणभरितं वादिराजो यतींद्रः ॥ ४६ ॥

**फलश्रुति–**

पद्यानि प्रथितापगाच्युतयशोहृद्यानि तत्खंडिता–
वद्येनामलवादिराजयतिना मध्वोक्तिशुद्धात्मना ।
बद्धान्यध्वरसिद्धसत्कृतचयोद्रिक्तोरुपुण्यप्रदा–
न्यद्धा यः पठते श्रुणोति स भवेदुद्दामधामा श्रियः ॥ ४७ ॥

॥ इति श्री वादिराज श्रीपादकृत तीर्थप्रबंधे दक्षिणप्रबंधः ॥

॥ इति श्रीवादिराजश्रीपादकृत तीर्थप्रबंधः॥